२१०. योगदर्शने कति प्रमाणानि स्वीकृतानि? नामानि लिखत।
उ. त्रीणि प्रमाणि। १. प्रत्यक्ष २. अनुमान ३. आगमश्च।
"प्रत्यक्षानुमानाऽऽगमाः प्रमाणानि" (पा. यो. सू. 1/7)

२११. प्रमाण शब्दस्य कोऽभिप्रायः अस्ति?
उ. प्रमीयते अनेन इति प्रमाणम्। प्रमेयस्य सम्यक् ज्ञानाय यानि प्रमाणानि अवलम्बते तदेव प्रमाणम् इति उच्यते। यतोहि लक्षणं प्रमाणाच्चैव प्रमेयस्य (वस्तुनः) सिद्धिर्भवति।

२१२. प्रत्यक्षप्रमाणं नाम किम्?
उ. "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" अर्थात् यानि वस्तुनः ज्ञानं इन्द्रियैः भवति सैव प्रत्यक्षप्रमाणम् इति। यथा - नेत्राभ्याम् दृष्टं पुस्तिका, कर्णाभ्यां श्रुतं गीतं, जिह्वया आस्वादितं भोजनम् नासिकया ग्रहीतः गन्धः, त्वक् माध्यमेन स्पर्शानुभवः इति।

२१३. अनुमानप्रमाणं नाम किम्?
उ. "अनुमीयते अनेन प्रमाणेन इत्यनुमानम्" अर्थात् येन प्रमाणेन अप्रत्यक्षीभूत वस्तु दृष्टिगोचरं भवति तद् प्रमाणम् अनुमानप्रमाणनाम्ना ज्ञायते। यथा - धूमं दृष्ट्वा अग्नेः ज्ञानम्। अनु अर्थात् पश्चात्; मानम् अर्थात् प्रमाणम् इति। अन्येषु शब्देषु वक्तुं शक्नुमः यत् प्रत्यक्ष - वस्तुनः ज्ञानान्तरम् अप्रत्यक्षीभूत पदार्थस्य ज्ञानं येन प्रमाणेन भवति तदनुमानमिति।

२१४. आगमप्रमाणं नाम किम्?
उ. यस्य वस्तुनः ज्ञानं प्रत्यक्षानुमानप्रमाणाऽऽधारेण न भवति किन्तु तस्य ज्ञानं विद्वद्भिः उक्तं वचनैः एवञ्च शास्त्राणामाधारेण भवति तत्

Scanned with CamScanner

आगमप्रमाणम् उच्यते। "आप्तवाक्यं शब्दः उत आप्तोपदेशः शब्दः" सत्यवक्तुः उपदेशवाक्य शब्दप्रमाणं, आगमप्रमाणमित्युच्यते। आचार्य ईश्वरकृष्णानुसारेण आप्तलक्षणं प्रतिपादितं यत् -

स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः।
निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः स तादृशः॥

अर्थात् येन पदार्थस्य निश्चयात्मकं ज्ञानं कृतं तम् आप्तम् इति उच्यते। सः आप्तपुरुषः ~~श्रे~~ रागद्वेषरहितो भूत्वा ~~कर~~ अनुभवाधारेण वस्तुनः स्वरूपकथनं करोति अतः तस्य वचनं प्रमाणं भवति।

Q.5. योगदर्शनानुसारं 'विपर्यय वृत्तिः' नाम किम्? सूत्रं विलिख्य व्याख्यां कुरु।

उ. सूत्रं → "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" (पा॰ यो॰ सू॰ 1/8)

अर्थात् यद् वास्तविकरूपेण वस्तु दृश्यते तम् अन्यरूपेण पश्यामश्चेत् तद् ज्ञानम् विपर्यय वृत्तिः उच्यते। यथा - रज्जौ सर्पस्य भानं/ज्ञानं इति। एतद् मिथ्याज्ञानमेव विपर्ययवृत्तिः उच्यते। विपर्ययमेव अविद्या वदामः इदमेव समस्त अनर्थ पदार्थानां जननी वर्तते।

Q.6. 'विकल्पवृत्तिः' नाम किम्?

उ. "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" (पा. यो. सू. 1/9)

अर्थात् वस्तुशून्यं भूत्वापि ~~शब्दमा~~ शब्दज्ञानमात्रेण उत्पन्नं चित्तवृत्तिं विकल्पवृत्तिः उच्यते। यथा- वन्ध्यापुत्रः, आकाशे पुष्पम्, शशकस्य सिंग, गर्दभस्य सिंग इति। एतेन विकल्पवृत्तिना संशयात्मकं ज्ञानं उत्पद्यते।

Q.7. 'निद्रावृत्तिः' नाम किम्?

उ. "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" (पा. यो. सू. 1/10) अर्थात् या वृत्ति जाग्रत, स्वप्नावस्थायां च ~~श्रे~~ अनुभवानां प्रतीतिः कारयति सा एव निद्रावृत्तिः उच्यते। अन्येषु शब्देषु मनुष्यं कस्यापि विषयस्य ज्ञानं न भवति यस्य ज्ञानाभावस्य प्रतीतिर्भवति यथा- सघननिद्रायां (गहरी निद्रा) मनुष्यम् इदम् ज्ञानं भवति यत् अद्य सघननिद्रा आगतवती एतस्य ज्ञानस्य कारणात् एव इयं वृत्तिः इति उक्तम्।

Scanned with CamScanner

प्र. योगदर्शनानुसारं 'स्मृतिवृत्तिः' किं भवति? व्याख्यायत। ✓

उ. "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः" (पा. यो. सू. 1/11) अर्थात् अनुभूतविषयाणां पुनःस्मरणमेव स्मृतिः उच्यते। इन्द्रियैः मनसा च अनुभूत-विषयाणां संस्कारः चित्तौ पतति तेषां कस्यापि निमित्तमाध्यमेन पुनःस्मरणम् उत् प्रकटीकरणं एव स्मृतिः इति। ~~संसारे~~ मनुष्यः संसारे स्थित्वा सम्यक् असम्यक्. सामान्यः असामान्यः, आनन्दप्रदं, कटुः, क्रोधं, घृणा इत्यादिभिः भिन्न-भिन्न कर्माणि क्रियते तथा च मनसा चिन्त्यते। एतेषु यस्य सम्यक्तया (गहरा) अनुभवः भवति। सः अनुभवः एव संस्कारः उच्यते। एते संस्काराः चित्तमुपरि स्थायीरूपेण पतति येषां प्रभावः जन्मपर्यन्तं भवति यावत् तेषां भोगसमाप्तं न भवति। एते संस्काराः सम्यक्, असम्यक्, मिश्रितम्च ~~त्रिभिः~~ त्रीभिः शक्तिं प्रभावयति। चित्तमुपरि स्थिताः संस्काराः यदा जागर्यते तदा एव 'स्मृतिः' इति कथ्यते।